## १. क्रियार्थोपपदस्य च कर्मणि स्थानिनः २/३/१४

**पदच्छेदः** - क्रियार्थोपपदस्य, च, कर्मणि, स्थानिनः - इति चतुष्पदमिदं सूत्रम्।

**अनुवृत्तिः**- **चतुर्थी सम्प्रदाने** इत्यस्मात् **चतुर्थी** इत्यनुवर्तते।

**समासः** - क्रियायै इयम् इति क्रियार्था (क्रिया), क्रियार्था उपपदं यस्य तत् क्रियार्थोपपदम्, तस्य। समीपोच्चरितं पदम् = उपपदम्। स्थानम् = प्रसक्तिः (एव) अस्य अस्ति (साक्षाद् उपस्थितं नास्ति) - स्थानी, तस्य- स्थानिनः = अप्रयुज्यमानस्य।

**वृत्तिः** - क्रियार्था क्रिया उपपदं यस्य, तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात्।

**विशेषः** - **तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ३/३/१०** इति सूत्रेण क्रियार्थायां क्रियायां तुमुन्-ण्वुल्-प्रत्ययौ विधीयेते, अतः क्रियार्थम् उपपदं 'क्रिया' एव भवति इति अनुमीयते। अतश्च सूत्रे साक्षात् तुमुनः कथनाभावेऽपि वृत्तौ 'अप्रयुज्यमानस्य तुमुनः' इत्युक्तम्। केवलं प्रत्ययस्य तु प्रयोगो न भवति, अतः 'प्रत्ययग्रहणे तदन्तग्रहणम्' इति परिभाषानुसारं 'तुमुन्नन्तस्य' इत्यर्थः लभ्यते। तुमुना सह ण्वुलः अपि विधानात् ण्वुलन्तस्यापि अत्र बोधः शक्यः तथापि आधिक्येन तुमुन्नतस्यैव प्रयोगात् तदुक्तम्।

**सूत्रार्थः** - क्रियार्था या क्रिया, तद् उपपदं यस्य, तस्य अप्रयुज्यमानस्य तुमुन्नन्तस्य ण्वुलन्तस्य च यत् कर्म, तस्मिन् चतुर्थीविभक्तिः भवति।

**उदाहरणम्**- फलेभ्यो याति = (फलानि आहर्तुम्/आहारकः याति)

नृसिंहाय नमस्कुर्मः। (नृसिंहम् अनुकूलयितुं नमस्कुर्मः)

स्वयम्भुवे नमस्कृत्य... (स्वयम्भुवम् अनुकूलयितुं नमस्कृत्य स्तौति।

अहं भोजनं (खादितुम्) पचामि

## २. तुमर्थाच्च भाववचनात् २/३/१५

**पदच्छेदः** - तुमर्थात्, च, भाववचनात् - चतुर्थीविधायकं त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** -**चतुर्थी सम्प्रदाने** इत्यस्मात् **चतुर्थी** इत्यनुवर्तते।

**समासः** - 'तुम्' इत्यनेन तुमर्थः लक्ष्यते। तुम् अर्थः यस्य सः तुमर्थः, तस्मात्।

भावः = क्रिया उच्यते अनेन इति भाववचनः, तस्मात्।

**वृत्तिः** - **भाववचनाश्च** इति सूत्रेण यः विहितः, तदन्तात् चतुर्थी स्यात्।

**विशेषः** - भाववचनाश्च 3/3/11 इति सूत्रेण- 'भावे' इति सूत्राधिकारे जायमानाः घञादिप्रत्ययाः क्रियार्थायां क्रियायां सत्यां भविष्यति अर्थे स्युः' इति नियमः क्रियते। तेन सूत्रेण प्रत्ययविधानानन्तरं यः कृदन्तशब्दः भवति, तस्मात् चतुर्थी स्यात् इति 'तुमर्थाच्च भाववचनात्' इति सूत्रं वदति।

**उदाहरणम्**- यागाय याति।

भूतये व्रजति।

## ३. नम:स्वस्तिस्वाहास्वधालंवषड्योगाच्च २/३/१६

**पदच्छेदः** – नम:स्वस्तिस्वाहास्वधालंवषड्योगात्, च – चतुर्थीविधायकं द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** – **चतुर्थी सम्प्रदाने** इत्यस्मात् **चतुर्थी** इत्यनुवर्तते।

**समासः** – नमश्च स्वस्ति च स्वाहा च स्वधा च अलं च वषट् च इति नम:स्वस्तिस्वाहास्वधालंवषटः, तैः योगः = नम:स्वस्ति-स्वाहा-स्वधालंवषड्योगः, तस्मात्।

**वृत्तिः** – एभिः योगे चतुर्थी स्यात्।

**उदाहरणम्**– हरये नम:। बालकेभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा।

**विशेषः** – केवलं 'नमस्' इत्यनेन योगे चतुर्थी भवति परन्तु यदा नमस्-शब्दः क्रियापदेन युक्तः भवति, तदा तु **उपपदविभक्तेः कारकविभक्तिः बलीयसी** इति न्यायेन कर्मत्वात् द्वितीयाविभक्तिः एव भवति।

तद्यथा- देवान् नमस्करोति।

## वार्तिकम्- अलमिति पर्याप्त्यर्थग्रहणम्।

**वार्तिकार्थः** – 'अलम्' इतिपदेन 'पर्याप्तिः' अर्थात् 'समर्थः' इति अर्थवन्तः

सर्वेऽपि शब्दाः गृह्यन्ते।

**उदाहरणम्-** दैत्येभ्यः हरिः अलम्/प्रभुः/समर्थः/शक्तः।

पर्याप्त्यर्थकानां प्रभु-आदिशब्दानां योगे तु षष्ठी अपि साधुरेव-

**तस्मै प्रभवति सन्तापादिभ्यः ५/१/१०१, स एषां ग्रामणीः ५/२/७८** - इत्येतयोः पाणिनीयसूत्रयोः उभयथाप्रयोगात्।

**विशेषः - चकारः पुनर्विधानार्थः।**

अत्र सूत्रे अन्त्ये 'च' इति शब्दस्य पृथक् ग्रहणं नियमयति यत् अत्र पठितः 'स्वस्तिशब्दः' कुशलार्थकः अस्ति इति कारणात् आशीर्विवक्षायां 'चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः' इति सूत्रेण षष्ठी प्राप्ता भवति, तामपि प्रबाध्य **नमस्स्वस्ति०** इति सूत्रेण चतुर्थी एव भवति।

अतः 'स्वस्ति गोभ्यः भूयात्' इत्येव भवति न तु 'स्वस्ति गवां भूयात्' इति भवति।

## ४. मन्यकर्मण्यनादरे विभाषाप्राणिषु २/३/१७

**पदच्छेदः -** मन्यकर्मणि, अनादरे, विभाषा, अप्राणिषु- चतुर्थीविधायकं चतुष्पदमिदं सूत्रम्।

**अनुवृत्तिः -** **चतुर्थी सम्प्रदाने** इत्यस्मात् **चतुर्थी** इत्यनुवर्तते।

**समासः -** **मन्यकर्मणि**- 'मन्य' इति दैवादिकस्य 'मन ज्ञाने' इति धातोः

श्यन्प्रत्यययुक्तस्य अनुकरणम् अस्ति, तस्य कर्म = मन्यकर्म, तस्मिन्- मन्यकर्मणि। **अनादरे**- न आदरः = अनादरः, तस्मिन्। **अप्राणिषु**- न प्राणिनः = अप्राणिनः, तेषु।

**वृत्तिः** - प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात् तिरस्कारे।

**सूत्रार्थः** - दैवादिकस्य 'मन ज्ञाने' इति धातोः यत् प्राणिभिन्नं कर्म भवति, तत्र विकल्पेन चतुर्थी स्यात्, यदि वाक्येन तिरस्कारार्थः बोध्येत।

**उदाहरणम्**- न त्वां तृणं मन्ये / न त्वां तृणाय मन्ये।

**वार्तिकम्- नौकाकान्नशुकशृगालवर्जेष्विति वाच्यम्।**

**वार्तिकार्थः** - सूत्रे विद्यमानस्य 'अप्राणिषु' इत्यस्य स्थाने

'नौ-काक-अन्न-शुक-श्रृगालवर्जेषु' इति पठनीयम्। अर्थात् केवलं प्राणिवाचकान् विहाय सूत्रस्य प्रवृत्तिः स्याद् इति न, अपि तु वातिर्के पठितान् शब्दान् अपि विहाय सूत्रस्य प्रवृत्तिः स्यात्। अतः -

**'न त्वां नावम् अन्नं वा मन्ये'** इत्यत्र नौ-अन्न-शब्दाभ्यां चतुर्थी न भवति।